## निबन्धसंक्षेपः (Abstract of the Ph.D. Thesis)

### ब्रह्मसूत्रस्थे तृतीयाध्यायस्य द्वितीयपादस्य शङ्कररामानुजनिम्बार्कबलदेवभाष्यदिशा विमर्शात्मकमध्ययनम्।

Brahmasūtrasthe Tṛtīyādhyāyasya Dvitīyapādasya śaṅkararāmānujanimbārkabaladevabhāṣyadiśā Vimarśātmakamadhyayanam

अनुसन्धाता : बुद्धदेवदासः,
अनुक्रमाङ्कः (ID) : B2050002,
मार्गनिर्देशकः : ड. शन्तनु-अयाचितः, प्राध्यापकः, संस्कृतदर्शनविभागः,
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्था, वेलुडमठः, हावडा, ७११२०२.

**कुञ्चिकाशब्दाः(Keywords)-** वेदान्तसूत्रम्, वेदान्तभाष्यम्, ब्रह्मसूत्रम्, ब्रह्मसूत्रभाष्यम्, शाङ्करभाष्यम्, श्रीभाष्यम्, रामानुजभाष्यम्, निम्बार्कभाष्यम्, गोविन्दभाष्यम्, बलदेवविद्याभूषणभाष्यम्, बलदेवभाष्यम्, उत्तरमीमांसाभाष्यम्।

ॐ व्यासञ्च शङ्कराचार्यं ततो रामानुजं बुधम्।

बलदेवञ्च निम्बार्कं सर्वान्वेदान्तिनो नुमः।।

निःश्रेयसपरा विद्या सर्वविद्यागरीयसी।

तत्त्वमस्यादिबोधेन मोक्षविद्या प्रसीदति।।

तस्माद्धि व्याससूत्रस्थे तृतीयस्य द्वितीयके।

तत्त्वंपदार्थतर्को हि बोधार्थं सङ्ग्रहीष्यते।।

### ०. भूमिका

वेदान्तसूत्राणां भागवतपुराणरूपं प्रथमं भाष्यं स्वयमेव सूत्रकारो भगवान् व्यासाचार्यश्चकार इति प्रसिद्धिः। तदुत्तरञ्च स्वस्वसाम्प्रदायिकभाष्याणि लिखितवत्सु शङ्कराचार्यः प्रामुख्यं भजते। एवमेव अन्येपि सूत्रभाष्यकलयितारः स्वाभिप्रायं कालोचितरूपेण काले काले कथितवन्तः। तेषु शङ्कराचार्यादिषु शङ्कररामानुजनिम्बार्कबलदेवानां चतुर्णां भाष्यभणनं विमर्ष्टुं मेऽयं प्रयासः। एतेषां चतुर्णाम् आचार्याणाम् अभ्याहरणसादृश्यपार्थक्यविशेषाः विमृश्यन्ते। तत्र च व्याससूत्रे तृतीयाध्यायस्य द्वितीये पादे विचारो वर्तयिष्यते।

### १. प्रबन्धविषयः

छान्दोग्योपनिषदः षष्ठाध्यायस्य अष्टमखण्डतः षोडशखण्डपर्यन्तं नववारं नवदृष्टान्तैः तत्त्वमसिवाक्यैश्च य ऐक्यबोधः प्रतिपादितः, स एव तत्त्वंपदार्थतात्त्विकबोधः प्रकृते ब्रह्मसूत्रस्य तृतीयाध्यायगतद्वितीयपादे चतुर्भाष्यदिशा समीक्ष्यते। किमर्थम् एषः तत्त्वंपदार्थविचारो विषयीकृतः किमर्थं वा एतानि चत्वारि भाष्याण्येव आधारीकृतानीति चेत् प्रसिद्धत्वान् मुख्यत्वाच्च। तत्त्वंपदार्थविचारः श्रुतिस्मृतिग्रन्थेषु अर्थाद् उपनिषद्गीताग्रन्थेषु मोक्षविद्यानिरूपणाय निश्चयेन प्रसिद्ध एव। लोकेऽपि यथा लौकिकानां तथा परीक्षकाणां चेतस्सु जीवब्रह्मविषयोऽनिर्वापितः सुप्ताग्निरिव वर्तत एव। उपनिषद्राशिं सम्यक् अनुशील्य ज्ञायते तत्पदार्थः ब्रह्म बोधयति, अपि च त्वंपदार्थः जीवं बोधयति। तथैव श्रीमद्गीताध्ययनेनापि समानार्थबोधो जायते। किन्तु व्याससूत्रस्य सूत्रत्वादेव भाष्यपरिदर्शनं विना बोधासौविध्यम्। ततः भाष्याणामेव अनुशीलनं कर्तव्यम्। भाष्यग्रन्थेषु शङ्कराचार्यस्य अद्वैतभाष्यं सुप्रसिद्धम्। अन्येषु च रामानुजनिम्बार्कबलदेवानां भाष्याण्यपि विपश्चिन्मनांसि आद्रियन्ते। तस्मात् प्रसिद्धत्वात् मोक्षविद्यायां मुख्यसहायकत्वाच्च तत्त्वंपदार्थविचारो निबन्धविषयीकृतः। स च विचारो ब्रह्मसूत्रे तृतीयाध्यायस्य

द्वितीयपादे मुख्यो विषयः। अतः स पादः मयाऽत्र निबन्धोपजीव्यीकृतः। श्रुत्यनुगुणतर्कमाश्रित्य च विचारः प्रवर्तितः, यतोहि यथा तर्कं विना विचारो न प्रवर्तितो भवति, तथैव श्रुत्यनुगुणतां विना तर्कानां न प्रतिष्ठा भवति। तर्कश्च सूत्रभाष्यटीकाग्रन्थेषु बहुलप्रयुक्तो दृश्यते। तस्मान् मुख्यानि चत्वारि ब्रह्मसूत्रभाष्याणि मया निबन्धविषयीकृतानि।

## २. विशयः-

श्रुतिवाक्येषु बहुधा पृथग्रूपेण जीवेश्वरब्रह्मप्रतिपादनम् अस्ति। तेषाम् ऐक्यमपि उपनिषत्सर्वाङ्गेषु सोदाहरणं प्रकटितम्। ऐक्यबोधकं तादृशम् एकं वाक्यम् अस्ति "तत्त्वमसि"[1] इति। तत्र तत्पदेन जीवो ग्राह्य ईश्वरो वा ब्रह्म वेति संशयः। अपि च त्वंपदेन को ग्राह्य इति प्रश्नः समुदेति। एतन्मुख्यप्रश्नद्वयकारणभूताः अनेके गौणसंशयाः प्रश्नाः वा समकाले भवन्ति। यथा—

२.१. सन्ध्याधिकरणे[2] संशयोऽस्ति "अथ रथान्रथयोगान्पथः सृजते"[3] इत्यत्र रथादिसृष्टेः तत्सृष्टिकर्तुश्च पारमार्थिकत्वं विद्यते उत नेति।

२.२. सन्ध्याधिकरणे स्वप्नावस्थाविषयकः परामर्शः कृतः। तदनन्तरं तदभावाधिकरणे[4] सुषुप्तिस्थानविषयकः संशय उत्पद्यते। यतो हि श्रुतौ सुषुप्त्यवस्थाविषये बहु वाक्यानि आपाततो विरुद्धानि प्राप्यन्ते। यथा हि –

"तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सृप्तो भवति"[5] इति, "ताभिः प्रत्यवसृप्य पुरीतति शेते"[6] इति, "तासु तदा भवति यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति"[7] इति, "य एषोऽन्तर्हृदय आकाशस्तस्मिञ्शेते"[8] इति, "सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति"[9] इति, "प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्"[10] इति च।

अतः किं नाड्यादीनि निरपेक्षरूपेण भिन्नानि सुषुप्तेः स्थानानि भवन्ति, अथवा सापेक्षरूपेण एकं सुषुप्तेः स्थानं भवति, सुषुप्त्यवस्था का, तस्याम् अवस्थायां सुप्तः कुत्र गच्छतीति संशयानां निश्चयस्स्वतो न जायते तस्माच्छ्रुत्यनुगुणतर्का आश्रयणीया एव। तर्कास्तु व्याससूत्रभाष्यटीकासु बहुलं प्रयुक्ताः।

२.३. कर्मानुस्मृतिशब्दविध्यधिकरणे संशयोऽनुद्यते- यः सत्सम्पन्नः तस्यैव प्रबोधो भवत्युत अन्यस्येति।

२.४. मुग्धाधिकरणे मुग्धावस्थायाः कुत्रान्तर्भाव इति निश्चीयते।

२.५. ब्रह्मविषयाः श्रुतयः उभयलिङ्गविषयाः सन्ति यथा "सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः"[11] इत्यादयः सविशेषलिङ्गाः, "अस्थूलमनण्वह्रस्वमदीर्घम्"[12] इत्यादयश्च निर्विशेषलिङ्गाः। अतः ब्रह्म सविशेषं प्रतिपत्तव्यम् उत निर्विशेषम् उत उभयलिङ्गम् इति संशयः उभयलिङ्गाधिकरणे विमृश्यते।

---

[1] छा.उ. ६।८।७

[2] ब्र.सू. ३।२।१

[3] बृ.उ. ४।३।१०

[4] ब्र.सू. ३।२।७

[5] छा.उ. ८।६।३

[6] बृ.उ. २।१।१९

[7] कौ.उ. ४।१९

[8] बृ.उ. २।१।१७

[9] छा.उ. ६।८।१

[10] बृ.उ. ४।३।२१

[11] छा.उ. ३।१४।२

[12] बृ.उ. ३।८।८

२.६. “नेति नेति”[13] इत्यत्र निषेधस्य विषयः कः इति प्रश्नः समुदेति यतो हि पूर्वं ब्रह्मणो द्वे रूपे प्रतिपादिते मूर्तञ्च अमूर्तञ्च। अत्र ब्रह्मणो रूपद्वयं निषिध्यते उत ब्रह्मैव निषिध्यते इति प्रकृतैतावत्त्वाधिकरणस्य संशयः।

२.७. “अथ य आत्मा स सेतुर्विधृतिः”[14] इति श्रुतिः आत्मानं सेतुरिति अभिदधाति। अनन्तरं “सेतुं तीर्त्वा”[15] इति श्रुतिः आत्मनं तीर्त्वा इत्यर्थं विवृणोति। अतः पराधिकरणे संशयः समुत्पद्यते किं ब्रह्मणः परमपि किञ्चित् तत्त्वम् अस्ति नास्ति वेति।

२.८. फलाधिकरणे निगद्यते त्रिविधफलहेतुता कस्येति प्रश्नः। किम् ईश्वरात् फलमुदेति उत कर्मण इति संशयः।

**३. पूर्वपक्षः-** यान् विषयान् आश्रित्य अष्टसु अधिकरणेषु संशयाः आगताः तान् एव आश्रित्य पूर्वपक्षमतान्यपि उत्थापितानि।

**४. सिद्धान्तः-** विषयविशयपूर्वपक्षमतानि चतुर्णाम् आचार्याणां भाष्येषु अवलोक्यानुशील्य विचार्य च सिद्धान्तं समपश्यम्।

**निष्कर्षः-** चतुर्णाम् आचार्याणां भाष्येषु सिद्धान्ताः अपि कदाचिच्चतुर्धा भिदेलिमाः। तेषां सादृश्यवैसादृश्ये आकलय्य यथामति सङ्कलयामि। यद्यपि अवस्थाभेदेन जीवः विराट्-तैजस-प्राज्ञरूपेण भिद्यते तथापि स परमार्थत एकम् अद्वितीयं ब्रह्मास्तीति जीवब्रह्मैक्यवादिनाम् अद्वैतिनां समयः। निम्बार्कदर्शने जीवेश्वरयोर्भेदाभेदौ उक्तौ। यथा समुद्रः तरङ्गश्च भिन्नावप्यभिन्नौ तथा जीवेश्वरौ भिन्नाभिन्नौ। अत्र भेदवक्त्रीं श्रुतिम् उदाहरति “ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता। अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्ममेतत्”[16] इति। अभेदवक्त्री च श्रुतिरस्ति “तत्त्वमसि”[17] इति। अत एवं तत्त्वंपदार्थविचारो जीवब्रह्मस्वरूपविचारो वा अन्यभाष्याधारेणापि अवश्यं कर्तव्यं, येन तयोरैक्यं वा द्वैतं वेति निश्चयः सुलभो भवेत्। तदर्थं मया चतुर्णाम् आचार्याणां शङ्कररामानुजनिम्बार्कबलदेवानां भाष्यावलोकनं क्रियते।

---

[13] बृ.उ. २।३।६

[14] छा.उ. ८।४।१

[15] छा.उ. ८।४।२

[16] श्वे.उ १।९

[17] छा.उ. ६।८।७